संस्कृतवार्ताः

27.10.2024

सायम्  - 06:20

<u>मुख्यवार्ताः</u>

· प्रधानमन्त्री नरेन्द्रमोदी अन्तर्जालीयपटले निगडनम् डिजिटल अरेरस्ट इति विषये चिन्ताम् प्रकटितवान्।

· आकाशवाण्या: मन की बात इति कार्यक्रमे प्रधानमन्त्री प्रोक्तवान् यत् भारते अन्तर्जालीय क्रीडाक्षेत्रं निरन्तरं विस्तारं प्राप्नोति । भारतीयअन्तर्जालीयक्रीडाः विश्वे सर्वत्र लोकप्रियाः भवन्ति।

· जापानदेशे निम्नसदनस्य मतदानं प्रचलति।

· फ्रांसदेशे द्वितीय-अन्तारार्राष्ट्रीय-महिला ओपन कोजेक्स चतुर्विंशत्यधिकद्विसहस्रतम वर्षस्य महिलाएकलस्य उपाधि: आकाङ्क्षा सलुन्खे इत्यनया विजिता।

<u>पीएम मन की बात</u>

प्रधानमन्त्री नरेन्द्रमोदी अन्तर्जालीयपटले निगडनम् डिजिटल अरेरस्ट इति विषये चिन्ताम् प्रकटितवान्। प्रधानमन्त्री अद्य आकाशवाण्याः मन की बात इति कार्यक्रमे प्रोक्तवान् यत् विधेनुरूपं कोऽपि अन्तर्जालीय निगडनं कर्तुं न शक्यते। सः अवदत् यत् एतत् छद्मकार्यं निवारयितुं सर्वाः अन्वेषण संस्थाः कार्यं कुर्वन्ति।

प्रधानमंत्री कार्यक्रमेस्मिन् एकस्य पीडितस्य जालसाधकस्य च वार्तालापस्य अपि परिचर्चां विहितवान्। वार्तालापसमये सः जालसाधकः आत्मानं सैन्यकार्मिकः मादकद्रव्यविभागस्य अधिकारी च इति कथयति स्म। एतादृशाः जालसाधकाः व्यक्तिगतसूचनां गृहीत्वा भयस्य वातावरणं निर्मान्ति। प्रधानमन्त्रिणा डिजिटलसुरक्षायाः त्रयः उपायाः चर्चिताः। अहं भवद्भ्यः डिजिटलसुरक्षायाः त्रीणि सोपानानि वदामि, तिष्ठतु, विचारयतु, करोतु च।

श्वः विश्वसजीवीकरणदिवसः अर्थात् विश्व एनिमेशन दिवसः अस्ति। अस्मिन् अवसरे प्रधानमन्त्रिणा उक्तं यत् भारतं एनिमेशनजगति नूतनक्रान्तिं प्रति गच्छति। सः जनानाम् आह्वानं कृतवान् यत् ते एनिमेशनजगति भारतं वैश्विकशक्तिं कर्तुं प्रतिज्ञां कुर्वन्तु।

श्रीमोदी प्रशंसां कृतवान् यत् छोटा भीम, ढोलक पुर का ढोल, कृष्णा, हनुमान तथा मोटू-पतलू एतेषां कार्यक्रमाणां प्रशंसकाः सम्पूर्णे विश्वे सन्ति।

प्रधानमन्त्री प्रोक्तवान् यत् भारते अन्तर्जालीय क्रीडाक्षेत्रं निरन्तरं विस्तारं प्राप्नोति। भारतीयअन्तर्जालीयक्रीडाः विश्वे सर्वत्र लोकप्रियाः भवन्ति । वैश्विकस्तरस्य अपि भारतीयप्रतिभाः अन्तर्जालीयक्रीडाक्षेत्रे महत्त्वपूर्णं योगदानं ददति। प्रधानमन्त्रिणा उक्तं यत् अधुना एनिमेशन एकः उद्योगः जातः। यः अन्येभ्यः उद्योगेभ्यः अपि बलं ददाति। वी.आर.पर्यटनम् अस्य उदाहरणम् अस्ति।

आत्मनिर्भरभारत-अभियानस्य सफलतां दृष्ट्वा प्रधानमन्त्री प्रसन्नतां प्रकटितवान् । सः अवदत् यत् एतत् अभियानम् देशस्य सामूहिकचेतनायाः भागम् अभवत् ।

प्रधानमन्त्री श्रोतृभ्यः आह्वानं कृतवान् यत् ते सामाजिकमाध्यमेषु नवीनतायाः आत्मनिर्भरस्य च भारतस्य उदाहरणानि अन्तर्जालीय तन्त्रांशे प्रेषयन्तु। अधुना उत्सव समयः वर्तते । सः जनानाम् आह्वानं विहितवान् यत् वस्तूनां क्रयार्थं Vocal for Local इति मन्त्रं मनसि स्थापयन्तु।

प्रधानमन्त्रिणा उक्तं यत् अस्मिन् वर्षे द्वयोः महानायकयोः – सरदारपटेलस्य, बिरसा मुण्डायाः च पञ्चाशदधिकैकशततमी जयन्ती वर्तते। अस्मिन् मासे एकत्रिंशे दिनाङ्के सरदारपटेलस्य पञ्चाशदधिकैकशततमी जयन्ती वर्तते। बिरसा मुण्डायाः पञ्चाशदधिकैकशततमी जयन्ती च नवम्बरमासस्य पञ्चदशे दिनाङ्के आचर्यते।

प्रधानमन्त्री निज-सम्बोधने सुलेखस्य अपि उल्लेखं कृतवान् । सः अवदत् यत् अद्यत्वे जम्मू-कश्मीरे स्थानीयसंस्कृतेः लोकप्रियतायै सुलेखस्य उपयोगः अपि क्रियते। प्रधानमंत्री रूसदेशस्य याकुत्सक नगरे सञ्जाते कालिदासस्य अभिज्ञानशकुन्तलम् इत्यस्य मञ्चनं अभिनन्दितवान्। सः लाओस्-नगरे सञ्जाते स्थानीयकलाकारैः लाओ-रामायणस्य मञ्चनं अपि प्रशंसितवान् ।

मन् की बात इत्यस्मिन् कार्यक्रमे प्रधानमन्त्री फिट् इण्डिया इत्यस्य विषये अपि चर्चां कृतवान्। सः प्रोक्तवान यत् भारतस्य जनाः शारीरिक स्वास्थ्यविषये अधिकाः जागरूकाः भवन्ति। श्री मोदी मन की बात इति कार्यक्रमे धनतेरस, दिवाली, छठ पूजा , गुरूनानक जयंती एतेषां पर्वणाम् शुभकामनाः जनेभ्यः प्रदत्ताः।

## दिल्ली प्रदूषण

सी.पी.सी.बी. इति केन्द्रीयप्रदूषण-नियन्त्रणमण्डलेन दिल्लीनगरस्य वायु-गुणवत्तास्तरं 'अतिदूषित' वर्गे स्थापितम्। अद्य अपराह्णे एकवादने नवदिल्ल्यां सी.पी.सी.बी-संस्थाया: वायुगुणवत्तासूचकाङ्क: षष्ठ्यधिक-त्रिशतं इति अभिलेख: जात:। शून्यत: पंचाशत् पर्यन्तं ए. क्यू आई इति वायुगुणवत्ता- सूचकाङ्क: साधु भवति, तत्रैव एकपञ्चाशत्त: शतपर्यन्तं संतोषजनकं भवति। अथ एकोत्तर-शतत: द्विशतपर्यन्तं मध्यम स्तरं भवति। एकोत्तरद्विशतत: त्रिशत-पर्यन्तं 'असाधु' भवति। एकाधिकत्रिशतत: चतु: शतपर्यन्तं 'अतीव असाधु' भवति। तत्रैव एकाधिकचतुर्शतत: पञ्चाशत्तोत्तर चतु: शत पर्यन्तं वायुगुणवत्ता स्तरं गंभीरं भवति।

## जापान निर्वाचन

जापानदेशे निम्नसदनस्य मतदानं प्रचलति। 'सत्तारूढ़ लिबरल डेमोक्रेटिक पार्टी' (LDP) इत्यस्य नेतारूपेण शिगेरू इशिबा इत्यस्य निर्वाचनानन्तरं त्रिदिवसाभ्यन्तरे एव अस्य निर्वाचनस्य घोषणा विहिता। शिरोरू इशिबा प्रधानमन्त्रित्वेन आधिकारिकरूपेण शपथग्रहणमपि न कृतवान्। एल डी पी इति दलेन निम्नसदनस्य पञ्चषष्ठ्यधिक चतु: शत आसनेषु सप्तचत्वारिंशदधिकद्विशत आसनानि प्राप्तानि। तत्रैव कोमेइटो इति दलेन द्वात्रिंशत् आसनानि अधिगतानि। सदनस्य बहुमतं प्राप्तुं कस्यचित् दलस्य त्रयस्त्रिंशदधिक द्विशत आसनानां आवश्यकता भवितुमर्हति।

## प्रधानमन्त्री – शतरंज ग्रेण्डमास्टर

प्रधानमन्त्री श्री नरेन्द्र मोदी भारतीय शतरंज ग्रेण्डमास्टर इत्युपाधिना समलङ्कृतं अर्जुन एरिगायसीं अभिनन्दितवान्। मोदी महोदय: स्वीय सन्देशे भारतीय गौरवं जनयितुं तस्य असाधारणप्रतिभाया:, दृढताया: च प्रशंसाम् अकरोत्। अनेन बहव: युवान: शतरंज क्रीडां क्रीडितुं समुत्सुका: भविष्यन्ति इति स: अवोचत्।

## स्क्वैश

फ्रांसदेशे द्वितीय-अन्तारार्ष्ट्रीय-महिला ओपन कोजेक्स चतुर्विंशत्यधिकद्विसहस्रतम वर्षस्य महिलाएकलस्य उपाधि: आकाङ्क्षा सलुन्खे इत्यनया विजिता। आकाङ्क्षा गतरात्रौ अन्तिमपक्षे मलेशियादेशस्य यश्मिता जदीशकुमारं पराजितवती।